# vAmadevagItA

# વામદેવગીતા

## Document Information

Text title : vAamadevagItA

File name : vaamadevagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi

Latest update : June 2, 1998

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

vAmadevagItA

# વામદેવગીતા

અધ્યાયઃ ૯૩
કથં ધર્મે સ્થાતુમિચ્છન્રાજા વર્તેત ધાર્મિકઃ ।
પૃચ્છામિ ત્વા કુરુશ્રેષ્ઠ તન્મે બ્રૂહિ પિતા મહ ॥ ૧॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
ગીતં દૃષ્ટાર્થતત્ત્વેન વામદેવેન ધીમતા ॥ ૨॥

રાજા વસુ મના નામ કૌસલ્યો બલવાઞ્શુચિઃ ।
મહર્ષિં પરિપપ્રચ્છ વામદેવં યશો વિનમ્ ॥ ૩॥

ધર્માર્થસહિતં વાક્યં ભગવન્નનુશાધિ મામ્ ।
યેન વૃત્તેન વૈ તિષ્ઠન્ન ચ્યવેયં સ્વધર્મતઃ ॥ ૪॥

તમબ્રવીદ્વામદેવસ્તપસ્વી જપતાં વરઃ ।
હેમવર્ણમુપાસીનં યયાતિમિવ નાહુષમ્ ॥ ૫॥

ધર્મમેવાનુવર્તસ્વ ન ધર્માદ્વિદ્યતે પરમ્ ।
ધર્મે સ્થિતા હિ રાજાનો જયન્તિ પૃથિવીમિમામ્ ॥ ૬॥

અર્થસિદ્ધેઃ પરં ધર્મં મન્યતે યો મહીપતિઃ ।
ઋતાં ચ કુરુતે બુદ્ધિં સ ધર્મેણ વિરોચતે ॥ ૭॥

અધર્મદર્શી યો રાજા બલાદેવ પ્રવર્તતે ।
ક્ષિપ્રમેવાપયાતોઽસ્માદુભૌ પ્રથમમધ્યમૌ ॥ ૮॥

અસત્પાપિષ્ઠ સચિવો વધ્યો લોકસ્ય ધર્મહા ।
સહૈવ પરિવારેણ ક્ષિપ્રમેવાવસીદતિ ॥ ૯॥

અર્થાનામનનુષ્ઠાતા કામચારી વિકત્થનઃ ।
અપિ સર્વાં મહીં લબ્ધ્વા ક્ષિપ્રમેવ વિનશ્યતિ ॥ ૧૦॥

અથાદદાનઃ કલ્યાણમનસૂયુર્જિતેન્દ્રિયઃ ।

વર્ધતે મતિમાન્રાજા સ્રોતોભિરિવ સાગરઃ ॥ ૧૧॥

ન પૂર્ણોઽસ્મીતિ મન્યેત ધર્મતઃ કામતોઽર્થતઃ ।
બુદ્ધિતો મિત્ર તશ્ચાપિ સતતં વસુધાધિપઃ ॥ ૧૨॥

એતેષ્વેવ હિ સર્વેષુ લોકયાત્રા પ્રતિષ્ઠિતા ।
એતાનિ શ્ૃણ્વઁલ્લભતે યશઃ કીર્તિં શ્રિયઃ પ્રજાઃ ॥ ૧૩॥

એવં યો ધર્મસંરમ્ભી ધર્માર્થપરિચિન્તકઃ ।
અર્થાન્સમીક્ષ્યારભતે સ ધ્રુવં મહદશ્નુતે ॥ ૧૪॥

અદાતા હ્યનતિ સ્નેહો દણ્ડેનાવર્તયન્પ્રજાઃ ।
સાહસ પ્રકૃતીરાજા ક્ષિપ્રમેવ વિનશ્યતિ ॥ ૧૫॥

અથ પાપં કૃતં બુદ્ધ્યા ન ચ પશ્યત્યબુદ્ધિ માન્ ।
અકીર્ત્યાપિ સમાયુક્તો મૃતો નરકમશ્નુતે ॥ ૧૬॥

અથ માનયિતુર્દાતુઃ શુક્લસ્ય રસવેદિનઃ ।
વ્યસનં સ્વમિવોત્પન્નં વિજિઘાંસન્તિ માનવાઃ ॥ ૧૭॥

યસ્ય નાસ્તિ ગુરુર્ધર્મે ન ચાન્યાનનુપૃચ્છતિ ।
સુખતન્ત્રોઽર્થલાભેષુ નચિરં મહદશ્નુતે ॥ ૧૮॥

ગુરુ પ્રધાનો ધર્મેષુ સ્વયમર્થાન્વવેક્ષિતા ।
ધર્મપ્રધાનો લોકેષુ સુચિરં મહદશ્નુતે ॥ ૧૯॥

અધ્યાયઃ ૯૪

યત્રાધર્મં પ્રણયતે દુર્બલે બલવત્તરઃ ।
તાં વૃત્તિમુપજીવન્તિ યે ભવન્તિ તદન્વયાઃ ॥ ૧॥

રાજાનમનુવર્તન્તે તં પાપાભિપ્રવર્તકમ્ ।
અવિનીત મનુષ્યં તત્ક્ષિપ્રં રાષ્ટ્રં વિનશ્યતિ ॥ ૨॥

યદ્વૃત્તિમુપજીવન્તિ પ્રકૃતિસ્થસ્ય માનવાઃ ।
તદેવ વિષમસ્થસ્ય સ્વજનોઽપિ ન મૃષ્યતે ॥ ૩॥

સાહસ પ્રકૃતિર્યત્ર કુરુતે કિં ચિદુલ્બણમ્ ।
અશાસ્ત્રલક્ષણો રાજા ક્ષિપ્રમેવ વિનશ્યતિ ॥ ૪॥

યોઽત્યન્તાચરિતાં વૃત્તિં ક્ષત્રિયો નાનુવર્તતે ।

જિતાનામજિતાનાં ચ ક્ષત્રધર્માદપૈતિ સઃ ॥ ૫॥

દ્વિષન્તં કૃતકર્માણં ગૃહીત્વા નૃપતી રણે ।
યો ન માનયતે દ્વેષાત્ક્ષત્રધર્માદપૈતિ સઃ ॥ ૬॥

શક્તઃ સ્યાત્સુમુખો રાજા કુર્યાત્કારુણ્યમાપદિ ।
પ્રિયો ભવતિ ભૂતાનાં ન ચ વિભ્રશ્યતે શ્રિયઃ ॥ ૭॥

અપ્રિયં યસ્ય કુર્વીત ભૂયસ્તસ્ય પ્રિયં ચરેત્ ।
નચિરેણ પ્રિયઃ સ સ્યાદ્યોઽપ્રિયઃ પ્રિયમાચરેત્ ॥ ૮॥

મૃષાવાદં પરિહરેત્કુર્યાત્પ્રિયમયાચિતઃ ।
ન ચ કામાન્ન સંરમ્ભાન્ન દ્વેષાદ્ધર્મમુત્સૃજેત્ ॥ ૯॥

નાપત્રપેત પ્રશ્નેષુ નાભિભવ્યાં ગિરં સૃજેત્ ।
ન ત્વરેત ન ચાસૂયેત્તથા સઙ્ગૃહ્યતે પરઃ ॥ ૧૦॥

પ્રિયે નાતિભૃશં હૃષ્યેદપ્રિયે ન ચ સઞ્જ્વરેત્ ।
ન મુહ્યેદર્થકૃચ્છ્રેષુ પ્રજાહિતમનુસ્મરન્ ॥ ૧૧॥

યઃ પ્રિયં કુરુતે નિત્યં ગુણતો વસુધાધિપઃ ।
તસ્ય કર્માણિ સિધ્યન્તિ ન ચ સન્ત્યજ્યતે શ્રિયા ॥ ૧૨॥

નિવૃત્તં પ્રતિકૂલેભ્યો વર્તમાનમનુપ્રિયે ।
ભક્તં ભજેત નૃપતિસ્તદ્વૈ વૃત્તં સતામ્ ઇહ ॥ ૧૩॥

અપ્રકીર્ણેન્દ્રિયં પ્રાજ્ઞમત્યન્તાનુગતં શુચિમ્ ।
શક્તં ચૈવાનુરક્તં ચ યુઞ્જ્યાન્મહતિ કર્મણિ ॥ ૧૪॥

એવમેવ ગુણૈર્યુક્તો યો ન રજ્યતિ ભૂમિપમ્ ।
ભર્તુરર્થેષ્વસૂયન્તં ન તં યુઞ્જીત કર્મણિ ॥ ૧૫॥

મૂઢમૈન્દ્રિયકં લુબ્ધમનાર્યં ચરિતં શઠમ્ ।
અનતીતોપધં હિંસ્રં દુર્બુદ્ધિમબહુશ્રુતમ્ ॥ ૧૬॥

ત્યક્તોપાત્તં મદ્યરતં દ્યૂતસ્ત્રી મૃગયા પરમ્ ।
કાર્યે મહતિ યો યુઞ્જ્યાદ્ધીયતે સ નૃપઃ શ્રિયઃ ॥ ૧૭॥

રક્ષિતાત્મા તુ યો રાજા રક્ષ્યાન્યશ્ચાનુરક્ષતિ ।
પ્રજાશ્ચ તસ્ય વર્ધન્તે ધ્રુવં ચ મહદશ્નુતે ॥ ૧૮॥

યે કે ચિદ્ભૂમિપતયસ્તાન્સર્વાનન્વવેક્ષયેત્ ।
સુહૃદ્ભિરનભિખ્યાતૈસ્તેન રાજા ન રિષ્યતે ॥ ૧૯॥

અપકૃત્ય બલસ્થસ્ય દૂરસ્થોઽસ્મીતિ નાશ્વસેત્ ।
શ્યેનાનુચરિતૈર્હ્યેતે નિપતન્તિ પ્રમાદ્યતઃ ॥ ૨૦॥

દૃઢમૂલસ્ત્વદુષ્ટાત્મા વિદિત્વા બલમાત્મનઃ ।
અબલાનભિયુઞ્જીત ન તુ યે બલવત્તરાઃ ॥ ૨૧॥

વિક્રમેણ મહીં લબ્ધ્વા પ્રજા ધર્મેણ પાલયન્ ।
આહવે નિધનં કુર્યાદ્રાજા ધર્મપરાયણઃ ॥ ૨૨॥

મરણાન્તમિદં સર્વં નેહ કિં ચિદનામયમ્ ।
તસ્માદ્ધર્મે સ્થિતો રાજા પ્રજા ધર્મેણ પાલયેત્ ॥ ૨૩॥

રક્ષાધિકરણં યુદ્ધં તથા ધર્માનુશાસનમ્ ।
મન્ત્રચિન્ત્યં સુખં કાલે પઞ્ચભિર્વર્ધતે મહી ॥ ૨૪॥

એતાનિ યસ્ય ગુપ્તાનિ સ રાજા રાજસત્તમ ।
સતતં વર્તમાનોઽત્ર રાજા ભુઙ્ક્તે મહીમિમામ્ ॥ ૨૫॥

નૈતાન્યેકેન શક્યાનિ સાતત્યેનાન્વવેક્ષિતુમ્ ।
એતેષ્વાપ્તાન્પ્રતિષ્ઠાપ્ય રાજા ભુઙ્ક્તે મહીં ચિરમ્ ॥ ૨૬॥

દાતારં સંવિભક્તારં માર્દવોપગતં શુચિમ્ ।
અસન્ત્યક્ત મનુષ્યં ચ તં જનાઃ કુર્વતે પ્રિયમ્ ॥ ૨૭॥

યસ્તુ નિઃશ્રેયસં જ્ઞાત્વા જ્ઞાનં તત્પ્રતિપદ્યતે ।
આત્મનો મતમુત્સૃજ્ય તં લોકોઽનુવિધીયતે ॥ ૨૮॥

યોઽર્થકામસ્ય વચનં પ્રાતિકૂલ્યાન્ન મૃષ્યતે ।
શ‍ૃણોતિ પ્રતિકૂલાનિ વિ મના નચિરાદિવ ॥ ૨૯॥

અગ્રામ્યચરિતાં બુદ્ધિમત્યન્તં યો ન બુધ્યતે ।
જિતાનામજિતાનાં ચ ક્ષત્રધર્માદપૈતિ સઃ ॥ ૩૦॥

મુખ્યાનમાત્યાન્યો હિત્વા નિહીનાન્કુરુતે પ્રિયાન્ ।
સ વૈ વ્યસનમાસાદ્ય ગાધ માર્તો ન વિન્દતિ ॥ ૩૧॥

યઃ કલ્યાણ ગુણાઞ્જ્ઞાતીન્દ્વેષાન્નૈવાભિમન્યતે ।
અદૃઢાત્મા દૃઢક્રોધો નાસ્યાર્થો રમતેઽન્તિકે ॥ ૩૨॥

અથ યો ગુણસમ્પન્નાન્હૃદયસ્યાપ્રિયાનપિ ।
પ્રિયેણ કુરુતે વશ્યાંશ્ચિરં યશસિ તિષ્ઠતિ ॥ ૩૩॥

નાકાલે પ્રણયેદર્થાન્નાપ્રિયે જાતુ સઞ્જ્વરેત્ ।
પ્રિયે નાતિભૃશં હૃષ્યેદ્યુજ્યેતારોગ્ય કર્મણિ ॥ ૩૪॥

કે માનુરક્તા રાજાનઃ કે ભયાત્સમુપાશ્રિતાઃ ।
મધ્યસ્થ દોષાઃ કે ચૈષામિતિ નિત્યં વિચિન્તયેત્ ॥ ૩૫॥

ન જાતુ બલવાન્ભૂત્વા દુર્બલે વિશ્વસેત્ક્વ ચિત્ ।
ભારુણ્ડ સદૃશા હ્યેતે નિપતન્તિ પ્રમાદ્યતઃ ॥ ૩૬॥

અપિ સર્વૈર્ગુણૈર્યુક્તં ભર્તારં પ્રિયવાદિનમ્ ।
અભિદ્રુહ્યતિ પાપાત્મા તસ્માદ્ધિ વિભિષેજ્જનાત્ ॥ ૩૭॥

એતાં રાજોપનિષદં યયાતિઃ સ્માહ નાહુષઃ ।
મનુષ્યવિજયે યુક્તો હન્તિ શત્રૂનનુત્તમાન્ ॥ ૩૮॥

અધ્યાયઃ ૯૫

અયુદ્ધેનૈવ વિજયં વર્ધયેદ્વસુધાધિપઃ ।
જઘન્યમાહુર્વિજયં યો યુદ્ધેન નરાધિપ ॥ ૧॥

ન ચાપ્યલબ્ધં લિપ્સેત મૂલે નાતિદૃઢે સતિ ।
ન હિ દુર્બલમૂલસ્ય રાજ્ઞો લાભો વિધીયતે ॥ ૨॥

યસ્ય સ્ફીતો જનપદઃ સમ્પન્નઃ પ્રિય રાજકઃ ।
સન્તુષ્ટપુષ્ટસચિવો દૃઢમૂલઃ સ પાર્થિવઃ ॥ ૩॥

યસ્ય યોધાઃ સુસન્તુષ્ટાઃ સાન્ત્વિતાઃ સૂપધાસ્થિતાઃ ।
અલ્પેનાપિ સ દણ્ડેન મહીં જયતિ ભૂમિપઃ ॥ ૪॥

પૌરજાનપદા યસ્ય સ્વનુરક્તાઃ સુપૂજિતાઃ ।
સધના ધાન્યવન્તશ્ચ દૃઢમૂલઃ સ પાર્થિવઃ ॥ ૫॥

પ્રભાવકાલાવધિકૌ યદા મન્યેત ચાત્મનઃ ।
તદા લિપ્સેત મેધા વી પરભૂમિં ધનાન્યુત ॥ ૬॥

ભોગેષ્વદયમાનસ્ય ભૂતેષુ ચ દયા વતઃ ।

વર્ધતે ત્વરમાણસ્ય વિષયો રક્ષિતાત્મનઃ ॥ ૭॥

તક્ષત્યાત્માનમેવૈષ વનં પરશુના યથા ।
યઃ સમ્યગ્વર્તમાનેષુ સ્વેષુ મિથ્યા પ્રવર્તતે ॥ ૮॥

ન વૈ દ્વિષન્તઃ ક્ષીયન્તે રાજ્ઞો નિત્યમપિ ઘ્નતઃ ।
ક્રોધં નિયન્તું યો વેદ તસ્ય દ્વેષ્ટા ન વિદ્યતે ॥ ૯॥

યદાર્યં જનવિદ્વિષ્ટં કર્મ તન્નાચરેદ્બુધઃ ।
યત્કલ્યાણમભિધ્યાયેત્તત્રાત્માનં નિયોજયેત્ ॥ ૧૦॥

નૈનમન્યેઽવજાનન્તિ નાત્મના પરિતપ્યતે ।
કૃત્યશેષેણ યો રાજા સુખાન્યનુબુભૂષતિ ॥ ૧૧॥

ઇદં વૃત્તં મનુષ્યેષુ વર્તતે યો મહીપતિઃ ।
ઉભૌ લોકૌ વિનિર્જિત્ય વિજયે સમ્પ્રતિષ્ઠતે ॥ ૧૨॥

ઇત્યુક્તો વામદેવેન સર્વં તત્કૃતવાન્નૃપઃ ।
તથા કુર્વંસ્ત્વમપ્યેતૌ લોકૌ જેતા ન સંશયઃ ॥ ૧૩॥

॥ ઇતિ વામદેવગીતા સમાપ્તા ॥

Adhyaya numbers 93-95 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar’s edition they are 92-94.

Sunder Hattangadi

*vAmadevagItA*
pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*